षोडशः पाठः

# भोजस्य शिक्षाप्रियता

## क्त्वा ल्यप् प्रत्ययौ

अस्ति मध्यप्रदेशस्य मालवक्षेत्रे धारा नाम नगरी। पुरा अस्याः नगर्याः शासकः नृपतिः भोजः आसीत्। नृपतेः आदेशः आसीत् यत्–

विप्रोऽपि यो भवेन्मूर्खः, सः पुराद् बहिरस्तु मे।
कुम्भकारोऽपि यो विद्वान्, स तिष्ठतु पुरे मम॥

भोजस्य शिक्षाप्रियताकारणेन शिक्षिताः जनाः एव धारानगर्यां वसन्ति स्म। एकदा उद्यानमार्गे विहरन् भोजः कमपि विप्रम् अपश्यत्। तस्य हस्ते चर्ममयं कमण्डलुं दृष्ट्वा तं च अतिदरिद्रं ज्ञात्वा राजा अपृच्छत्- ''विप्र! चर्मपात्रं किमर्थं हस्ते वहसि?'' सः च विप्रः मुखशोभया विनम्रप्रश्नेन च तं भोजं मत्वा प्रणम्य अकथयत्- ''देव! सम्प्रति लौहस्य ताम्रस्य च अभावः जातः। अतः चर्ममयं पात्रं वहामि।''

भोजः पुनः अपृच्छत्- ''विप्र। कथं लौह-ताम्रयोः अभावः?'' तदा विप्रः पद्यं पठति-

अस्य श्रीभोजराजस्य, द्वयमेव सुदुर्लभम्।
शत्रूणां शृङ्खलैःलौहं, ताम्रं शासनपत्रकैः॥



राजा प्रसन्नो भूत्वा तस्मै कवये ताम्रप्रशस्तिपत्रं धनराशिं च पुरस्काररूपेण अयच्छत्। शिक्षितानां सम्मानकारणेन भोजस्य नाम अद्यापि भारते प्रसिद्धम्।

## शब्दार्था:

| | | | | | |
|---|---|---|---|---|---|
| पुरा | = | प्राचीन समय में | बहि: | = | बाहर |
| ईदृश: | = | इस प्रकार | चर्ममयम् | = | चमड़े से बना हुआ |
| कमण्डलुम् | = | पानी रखने के पात्र को | शृङ्खलै: | = | जञ्जीरों से |
| अस्तु | = | हो | अयच्छत् | = | प्रदान किया |
| विप्र: | = | ब्राह्मण | सम्प्रति | = | आजकल |
| विहरन् | = | घूमते हुए | ताम्रप्रशस्तिपत्रं | = | तांबे का प्रशंसा पत्र |

## अभ्यास:

१. एकपदेन उत्तरं लिखत —

(क) धारानगर्या: नृपति: क: आसीत्?

(ख) धारानगरी कुत्र अस्ति?

(ग) विप्रस्य हस्ते किम् आसीत्?

२. एकवाक्येन उत्तरं लिखत–

(क) भोजस्य नाम केन कारणेन प्रसिद्धम्?

(ख) विप्रम् अति दरिद्रं ज्ञात्वा राजा किम् अपृच्छत्?

३. उच्चारयत कण्ठस्थं कुरुत च—

| | | | | |
|---|---|---|---|---|
| भू + क्त्वा | = | भूत्वा | = | होकर |
| ज्ञा + क्त्वा | = | ज्ञात्वा | = | जानकर |
| कृ + क्त्वा | = | कृत्वा | = | करके |
| श्रु + क्त्वा | = | श्रुत्वा | = | सुनकर |
| सम् + भू + ल्यप् | = | सम्भूय | = | होकर |
| वि + ज्ञा + ल्यप् | = | विज्ञाय | = | जानकर |
| आ + गम् + ल्यप् | = | आगत्य | = | आकर |

४. कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत–

(क) शिक्षितानां सम्मानं ---------- भोजः प्रसिद्धः अभवत्। (दृष्ट्वा/कृत्वा)

(ख) राजा प्रसन्नो ---------- तस्मै पुरस्कारं अयच्छत्। (भूत्वा/ज्ञात्वा)

(ग) लौहशृङ्खलायाः आवश्यकता --------- कृते अस्ति। (शत्रूणां/मूर्खाणां)

५. पर्यायमेलनं कुरुत–

| | (अ) | (ब) |
|---|---|---|
| (क) | राजा | पुष्पम् |
| (ख) | शत्रुः | विनीतः |
| (ग) | विप्रः | भूपतिः |
| (घ) | विनम्रः | वैरी |
| (ङ) | कुसुमम् | द्विजः |

## योग्यताविस्तारः —

- पदानां विभक्तिं वचनं च लिखत–

| | पदानि | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | शिक्षिताः | ---------- | ----------- |
| (ख) | जनाः | ---------- | ----------- |
| (ग) | मार्गे | ---------- | ----------- |
| (घ) | भोजं | ---------- | ----------- |
| (ङ) | प्रदेशस्य | ---------- | ----------- |
| (च) | कवये | ---------- | ---------- |

- 'कवि' शब्दस्य रूपाणि लिखत।